# Dhumravarna Bhaktipanchaka Stotram Ahamkritam

# અહંકૃતં ધૂમ્રવર્ણભક્તિપઞ્ચકસ્તોત્રમ્

## Document Information

Text title : Dhumravarna Bhaktipanchaka Stotram Ahamkritam

File name : dhUmravarNabhaktipanchakastotramahaMkRRitaM.itx

Category : ganesha, mudgalapurANa, panchaka, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 7 | 8.7 32-46||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# અહંકૃતં ધૂમ્રવર્ણભક્તિપઞ્ચકસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
અહમુવાચ ।
યદિ મે વરદોઽસિ ત્વં ધૂમ્રવર્ણ ગજાનન ।
તદા તે પાદપદ્મે વૈ ભક્તિં દેહિ પરાં વિભો ॥ ૧॥
ગાણપત્યં કુરુષ્વ ત્વં માં ગણેશપરાયણમ્ ।
ગાણપત્યપ્રિયં તાત સદા સદ્ભાવભાવિકમ્ ॥ ૨॥
સ્થાનં દેહિ તથા વૃત્તિં યોગક્ષેમકરીં પરામ્ ।
તત્રસ્થસ્ત્વાં ભવિષ્યામિ દાસોઽહં તે ગજાનન ॥ ૩॥
નાન્યં યાચે કદા નાથ શ્યોઙ્કારામોહમોહિતમ્ ।
સિદ્ધિબુદ્ધિયુતં ત્વાહં ભજિષ્યામિ વિશેષતઃ ॥ ૪॥
બોધિતો ગુરુણાઽત્યન્તં તસ્ય વાક્યપરાયણઃ ।
યોગશાન્તિમયં રૂપં ભજિષ્યામિ મહોદર ॥ ૫॥
(ફલશ્રુતિઃ)
ધૂમ્રવર્ણ ઉવાચ ।
મયિ ભક્તિર્દૃઢા તેઽસ્તુ મયિ દાસ્યપરાયણઃ ।
ગાણપત્યપ્રિયો ભૂત્વા ચરિષ્યસિ ન સંશયઃ ॥ ૬॥
યત્રાદૌ મે મહાદૈત્ય પૂજનં નૈવ વિદ્યતે ।
તત્ર કર્મસુ તે સ્થાનં ભુઙ્ક્ષ્વ કર્મફલં મહત્ ॥ ૭॥
કાર્યાદૌ સ્મરણં મે ન તત્ર ત્વં સુસ્થિરો ભવ ।
આસુરેણ સ્વભાવેન ભ્રંશયસ્વ નિરન્તરમ્ ॥ ૮॥
સ્વપુરે ગચ્છ દૈત્યેન્દ્ર મદ્ભક્તાન્ રક્ષ સર્વદા ।
મદહઙ્કૃતિસંયુક્તાન્ કુરુ ત્વં નિત્યમાદરાત્ ॥ ૯॥
યત્ર મે સ્મરણં ચાદૌ પૂજનં સર્વકર્મસુ ।
તત્ર સાધુસ્વભાવેન વર્તસ્વ તદહઙ્કૃતિઃ ॥ ૧૦॥
ગણેશભક્તિસંયુક્તો મદીયાહઙ્કૃતેર્ધરઃ ।

ભવિષ્યસિ ન સન્દેહો ગચ્છ ગચ્છ મદાજ્ઞયા ॥ ૧૧॥
શ્રીશિવ ઉવાચ ।
એવમુક્ત્વા ગણાધીશસ્તમહં વિરરામ હૈ ।
પ્રણમ્ય તમહઙ્કારઃ યયૌ સ્વનગરં મુદા ॥ ૧૨॥
તાદૃશં તં પરિજ્ઞાય દૈત્યેશા દુઃખસંયુતાઃ ।
ત્યક્ત્વા પાતાલગાઃ સર્વે બભૂવુર્ભયવિહ્વલાઃ ॥ ૧૩॥
સ એવ સુખસંયુક્તોઽભજત્તં ગણનાયકમ્ ।
અનન્યમનસા ધ્યાત્વા ધૂમ્રવર્ણધરં પરમ્ ॥ ૧૪॥
યથા જગાદ વિઘ્નેશસ્તથા ચકાર ભાવતઃ ।
અહઙ્કારાસુરશ્ચૈવ શાન્તરૂપો બભૂવ હ ॥ ૧૫॥

ઇતિ અહંકૃતં ધૂમ્રવર્ણભક્તિપઞ્ચકસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૭ । ૮.૭ ૩૨-૪૬॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 7 . 8.7 32-46..

Proofread by Yash Khasbage, Preeti Bhandare

*Dhumravarna Bhaktipanchaka Stotram Ahamkritam*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*